श्रीहनुमत्स्तोत्रं विभीषणकृतम्

{॥ श्रीहनुमत्स्तोत्रं विभीषणकृतम् ॥}

श्रीगणेशाय नमः ।

नमो हनुमते तुभ्यं नमो मारुतसूनवे ।

नमः श्रीरामभक्ताय श्यामास्याय च ते नमः ॥ १॥

नमो वानरवीराय सुग्रीवसख्यकारिणे ।

लङ्काविदाहनार्थाय हेलासागरतारिणे ॥ २॥

सीताशोकविनाशाय राममुद्राधराय च ।

रावणान्तकुलच्छेदकारिणे ते नमो नमः ॥ ३॥

मेघनादमखध्वंसकारिणे ते नमो नमः ।

अशोकवनविध्वंसकारिणे भयहारिणे ॥ ४॥

वायुपुत्राय वीराय आकाशोदरगामिने ।

वनपालशिरश्छेदलङ्काप्रासादभञ्जिने ॥ ५॥

ज्वलत्कनकवर्णाय दीर्घलाङ्गूलधारिणे ।

सौमित्रिजयदात्रे च रामदूताय ते नमः ॥ ६॥

अक्षस्य वधकर्त्रे च ब्रह्मपाशनिवारिणे ।

लक्ष्मणाङ्गमहाशक्तिघातक्षतविनाशिने ॥ ७॥

रक्षोघ्नाय रिपुघ्नाय भूतघ्नाय च ते नमः ।

ऋक्षवानरवीरौघप्राणदाय नमो नमः ॥ ८॥

परसैन्यबलघ्नाय शस्त्रास्त्रघ्नाय ते नमः ।

विषघ्नाय द्विषघ्नाय ज्वरघ्नाय च ते नमः ॥ ९॥

महाभयरिपुघ्नाय भक्तत्राणैककारिणे ।

परप्रेरितमन्त्राणां यन्त्राणां स्तम्भकारिणे ॥ १०॥

पयःपाषाणतरणकारणाय नमो नमः ।

बालार्कमण्डलग्रासकारिणे भवतारिणे ॥ ११॥

नखायुधाय भीमाय दन्तायुधधराय च ।

रिपुमायाविनाशाय रामाज्ञालोकरक्षिणे ॥ १२॥

प्रतिग्रामस्थितायाथ रक्षोभूतवधार्थिने ।

करालशैलशस्त्राय द्रुमशस्त्राय ते नमः ॥ १३॥

बालैकब्रह्मचर्याय रुद्रमूर्तिधराय च ।

विहङ्गमाय सर्वाय वज्रदेहाय ते नमः ॥ १४॥

कौपीनवाससे तुभ्यं रामभक्तिरताय च ।

दक्षिणाशाभास्कराय शतचन्द्रोदयात्मने ॥ १५॥

कृत्याक्षतव्यथाघ्नाय सर्वक्लेशहराय च ।

स्वाम्याज्ञापार्थसङ्ग्रामसङ्ख्ये सञ्जयधारिणे ॥ १६॥

भक्तान्तदिव्यवादेषु सङ्ग्रामे जयदायिने ।

किल्किलाबुबुकोच्चारघोरशब्दकराय च ॥ १७॥

सर्पाग्निव्याधिसंस्तम्भकारिणे वनचारिणे ।

सदा वनफलाहारसन्तृप्ताय विशेषतः ॥ १८॥

महार्णवशिलाबद्धसेतुबन्धाय ते नमः ।

वादे विवादे सङ्ग्रामे भये घोरे महावने ॥ १९॥

सिंहव्याघ्रादिचौरेभ्यः स्तोत्रपाठाद् भयं न हि ।

दिव्ये भूतभये व्याधौ विषे स्थावरजङ्गमे ॥ २०॥

राजशस्त्रभये चोग्रे तथा ग्रहभयेषु च ।

जले सर्वे महावृष्टौ दुर्भिक्षे प्राणसम्प्लवे ॥ २१॥

पठेत् स्तोत्रं प्रमुच्येत भयेभ्यः सर्वतो नरः ।

तस्य क्वापि भयं नास्ति हनुमत्स्तवपाठतः ॥ २२॥

सर्वदा वै त्रिकालं च पठनीयमिदं स्तवम् ।

सर्वान् कामानवाप्नोति नात्र कार्या विचारणा ॥ २३॥

विभीषणकृतं स्तोत्रं तार्क्ष्येण समुदीरितम् ।

ये पठिष्यन्ति भक्त्या वै सिद्ध्यस्तत्करे स्थिताः ॥ २४॥

इति श्रीसुदर्शनसंहितायां विभीषणगरुडसंवादे

विभीषणकृतं हनुमत्स्तोत्रं सम्पूर्णम् ॥

Encoded and proofread by Ravindra Bhalekar ravibhalekar @ hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Hanumath Stotram 4 (By Vibhishana) Lyrics in Devanagari PDF
% File name : hanumatstotramvibhishanam.itx
% Location : doc_hanumaana
% Language : Sanskrit
% Subject : hinduism/religion
% Transliterated by : Ravindra Bhalekar ravibhalekar at hotmail.com

% Proofread by : Ravindra Bhalekar ravibhalekar at hotmail.com
% Latest update : March 19, 2004
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website